श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यदुगिरीश सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यदुगिरीश सुप्रभातम् ॥

श्रीमन् यदुक्षितिभृदीश ! हरे ! मुरारे !
नारायण ! प्रणतसंसृतितारकाङ्घ्रे !।
श्रीमन्दिरायतमनोज्ञविशालवक्षः !
श्रीयादवाचलपते ! तव सुप्रभातम् ॥ 1 ॥

आदौ कृते कमलजन्मनि सत्यलोके
त्वाऽभ्यर्च्य दत्तवति भोः स्वकुमारकाय !।
तेनावतीर्य वसुधाकृतसन्निधान !
श्रीयादवाचलपते ! तव सुप्रभातम् ॥ 2 ॥

इन्द्रानलान्तकनिरृत्यपयोऽधिराजैः
नित्यं समीरणधनाधिपशर्वमुख्यैः।
संसेव्यमानचरणाम्बुज दिव्यधामन् !
श्रीयादवाचलपते ! तव सुप्रभातम् ॥ 3 ॥

श्रीसैन्यनायकपराङ्कुशनाथसूरि -
पद्माक्षरामयमुनार्यसुपूर्णवर्यैः।
श्रीलक्ष्मणाखिलवरार्यमदार्यमुख्यैः
नित्यार्चिताङ्घ्रिक ! विभो ! तव सुप्रभातम् ॥ 4 ॥

अष्टाक्षराण्यपि सुतीर्थमिषेण वेद -
दर्भाब्जयादवपलाशपराशराद्यैः।

नारायणाच्युतपदाख्यसरिद्भिरुच्चैः
सेव्यत्पदाम्बुज ! यदूत्तम ! सुप्रभातम् ॥ 5 ॥

क्षेत्रैः पटाश्मनरसिंहमहीध्रसंवि -
दश्वत्थतार्क्ष्यनयनादिवराहमुख्यैः ।
सीताटवीप्रभृतिभिश्श्रितदिव्यधामन् !
श्रीयादवाचलपते ! तव सुप्रभातम् ॥ 6 ॥

मन्त्रार्थमुद्गिरति ते मम नाथ ! वक्षः
पादौ द्वयस्य परमार्थमुदाहरन्तौ ।
श्लोकार्थमीश ! विवृणोति तवैष हस्तो -
ऽप्येवं समीरणयदूत्तम ! सुप्रभातम् ॥ 7 ॥

यत्कौतुकं तव गजेन्द्रविपद्विनोदे
या च त्वरा द्रुपदजापरिपालने वा ।
तद्रूपया त्वरितया भवसिन्धुमग्नं
मां तारयेह यदुशैलमणे ! प्रभातम् ॥ 8 ॥

प्रातस्सुनिश्चलमतिर्यदुशैलबन्धोः
यो वा पठेदनुदिनं यदि सुप्रभातम् ।
तस्मै विहङ्गगमनः कमलासहायः
नारायणः परगतिं सुलभां प्रसूते ॥ 9 ॥

जय जय सुप्रभातमरविन्दविलोचन ! ते
जय जय यादवाद्रिशिखरोज्ज्वलदीप ! हरे !।
जय जय भाष्यकारकृतमङ्गळभक्तनिधे !
जय जय देवदेव ! विनतानभिनन्दय नः ॥ 10 ॥

श्रीकल्याणीविलसद्यदुगिरिनारायणार्थिकल्पतरो !।
सम्पत्कुमार ! भवते नित्यश्रीर्नित्यमङ्गळं भूयात् ॥ **11** ॥

॥ इति श्री यदुगिरीश सुप्रभातं समाप्तम् ॥